अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS 201**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**

**एम.ए. संस्कृतम्, (सत्रम् : द्वितीयम)**
**वेदाङ्गम् उपनिषत् च**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

**खण्डः क**
**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. अधोलिखितानां मन्त्राणाम्/गद्यानाम् सप्रसङ्गं व्याख्यां कुरु –
   अग्नीर्मूर्धा चक्षुषी चन्द्रसूर्यौ, दिशः श्रोते वाग् विवृताश्च वेदाः।
   वायुः प्राणो हृदयं विश्वमस्य, पद्मा, पृथिवी ह्येष सर्वभूतान्तरात्मा।।
2. स्वर्गे लोके न भयं किञ्चनास्ति, न तत्र त्वं न जरया बिभेसि।
   उभे तीर्त्वाऽशनायापिपासे, शोकातिगो मोदते स्वर्गलोके।।
3. सादीर्णो मूर्घ्न्यभिहतो वक्त्रमापद्य मारुतः, वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः।
   स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः, इति वर्णविदः प्राहुर्निपुणं तान्निबोधतः।।
4. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
   तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीति।।
5. चिद् 'इत्येषोऽनेककर्मा', 'आचार्यश्च', चिद् ब्रूयाद् इति पूजायाम् (आचार्यः कस्मात्?) आचार्य आचारं ग्राहयति, आचिनोति अर्थान्, आचिनोति बुद्धिम् इति वा।

**खण्डः ख**
**(लघूत्तरोयप्रश्नाः)**

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. उपनिषत्साहित्ये मुण्डकोपनिषदः स्थाननिर्धारणं कुरु।
2. नचिकेतसा प्राप्तानां वराणा वर्णनं कुरु।
3. कौत्समतानुसारेण 'अनर्थका हि मन्त्राः' एतत्सिद्धिं कुरु।
4. पाणिनीयशिक्षानुसारेण उत्तमपाठकाधमपाठकयोः लक्षण किम्?
5. कठोपनिषदः वर्ण्यविषयः कः? विवेचनं कुरु।
6. पाणिनीयशिक्षानुसारेण वर्णानामुत्पत्तिः कीदृशी भवति?

## खण्डः ग

## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. 'सत्यमेव जयते' इति महावाक्यं कुत्र उल्लिखितमस्ति?
   (अ) मुण्डकोपनिषदि (ब) कठोपनिषदि
   (स) निरुक्ते (द) पाणिनीयशिक्षायाम्
2. कति वेदाङ्गानि सन्ति?
   (अ) अष्ट (ब) दश
   (स) षट् (द) द्वादश
3. यास्कमते 'उषा' इति पदस्य निर्वचनमस्ति ...............
   (अ) उदेति (ब) उदासते
   (स) उद्गच्छति (द) उच्छति
4. 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' इति अयं मन्त्रः कुतः ग्रहीतः अस्ति?
   (अ) माण्डूक्योपनिषदः (ब) मुण्डकोपनिषदः
   (स) कठोपनिषदः (द) ईशावास्योपनिषदः
5. 'अग्निविद्याविवेचकः' इति उपनिषद्ग्रन्थः अस्ति ............................
   (अ) मुण्डकोपनिषदः (ब) तैत्तरीयोपनिषदः
   (स) कठोपनिषदः (द) केनोपनिषदः
6. कति भावविकाराः विद्यन्ते?
   (अ) त्रयः (ब) षट्
   (स) अष्ट (द) चतुर्दश
7. यास्कमते आख्यातलक्षणमस्ति ..........................................
   (अ) सत्त्वप्रधानम् (ब) शब्दप्रधानम्
   (स) धातुप्रधानम् (द) भावप्रधानम्
8. 'विश्वान् नरान् नयति' इति कस्य निर्वचनम् अस्ति ?
   (अ) विश्वकर्मणः (ब) वैश्वानरस्य
   (स) विश्वस्य (द) विश्वामित्रस्य
9. निरुक्ते कस्य नामोल्लेखः नास्ति?
   (अ) व्याडेः (ब) गालवस्य
   (स) गार्ग्यस्य (द) औपमन्यवस्य
10. अर्थावबोधे निरपेक्षतया पदजातं यत्र उक्तं तत् निरुक्तम् इति कस्येयमुक्तिः ?
    (अ) माधवाचार्यस्य (ब) भर्तृहरेः
    (स) यास्कस्य (द) सायणाचार्यस्य

---------------x---------------